श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला–२१

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 3 वर्षम् :– २०१७ – १८

प्रधानसम्पादकः

प्रो. गोपबन्धुमिश्रः

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकौ

डॉ. डी. एम्. मोकरिया, सहायकाचार्यः

डॉ. बी. उमामहेश्वरी, सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी–वेरावलम्

प्रकाशकः -

डॉ. दशरथजादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७

www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -

डॉ. कार्तिकपण्डया

संशोधनाधिकारी

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2020*

Note : The statements and views expressed by the authors of articles in this conference proceeding are their own and not necessarily of the editors. The responsibility of the facts stated opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

| | | |
|---|---|---|
| संस्करणम् | | प्रथमम् |
| वर्षम् | | मार्च २०२० |
| प्रतिकृतय | | ३५० |
| ISBN | - | 978-93-83097-42-5 |
| मूल्यम् | - | रु. १८०/- |

मुद्रकः - **जलाराम ग्राफिक्स एन्ड ओफसेट**

परमहंस एपार्टमेन्ट के पास,

होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६

जि. गीर सोमनाथ, गुजरात (भारत)

दूरभाष : (०२८७६) २२१८६१

# विषयानुक्रमणिका


| क्रमः | विषयः | पृष्ठः |
|---|---|---|
| १. | वैदिकस्वराणां वैशिष्ट्यम्<br>प्रो. देवेन्द्रनाथ पाण्डेयः | 1 |
| २. | श्रीमद्भगवद्गीतायां निरूपितानि ज्ञानलक्षणानि<br>डॉ. नरेन्द्रकुमारः एल्. पण्ड्या | 10 |
| ३. | चतुर्दशसूत्र्यां सन्ध्यभावविचारः द्विर्हकारोपात्तविचारश्च<br>प्रो. विनोदकुमार झा | 20 |
| ४. | सम्बन्धप्रियो भवभूतिः<br>प्रो. अर्चना दुबे | 30 |
| ५. | धर्मशास्त्राणुसारेण विवाहप्रथा<br>प्रो. महेन्द्रकुमारः अं दवे | 44 |
| ६. | वैदिकी देवता<br>डॉ. शत्रुघ्न पाणिग्राही | 50 |
| ७. | श्रीमद्भगवद्गीतानुसारेण शान्तिप्राप्त्युपायाः<br>डॉ. पङ्कजकुमार रावलः | 58 |
| ८. | सज्जनचरित्रम्<br>डॉ. डायालालः मोकरिया | 67 |
| ९. | गुरुत्वद्रवत्वयोः वैज्ञानिकं चिन्तनम्<br>डॉ. बी. उमामहेश्वरी | 77 |
| १०. | आत्मनः अखण्डार्थत्वम्<br>डॉ. जानकीशरणः आचार्यः | 83 |
| ११. | હકારાત્મક મનોવલણ<br>ડૉ. જયેશકુમાર ડી. મુંગરા | 96 |
| १२. | Sanskrit E-Resources on Internet<br>Mr. Ravindra Kale | 101 |
| | | |

# वैदिकी देवता

डॉ.शत्रुघ्न पाणिग्राही
सहायकाचार्यः,
श्री सोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्, गुजरात।

यथा लोके राष्ट्रसञ्चालनार्थं जनाः विभज्य कार्यं कुर्वन्ति तथैव ब्रह्माण्डसञ्चालनार्थं परमेश्वरस्य विविधरूपाणि विभिन्ननामभिः कर्मभिश्च सम्बोध्यन्ते।[1] ताः शक्तयः (देवः) देवताशब्देनाभिधीयन्ते। असाधारणतया यः अपरेभ्यः ददाति सः देवः कथ्यते। अथवा यः कान्तिमान् द्युतिमान् सः देवो भवति। अतः श्रूयते–"देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानोभवतीतिवायोदेवःसादेवता"।[2]

देवताज्ञानस्यावश्यकता--

वेदः भवति यज्ञप्रधानः। यागे देवतायाः प्राधान्यं वर्तते। दैवाधीनं जगत् सर्वं मन्त्राधीनास्तु देवताः इति। देवताज्ञानार्थं मन्त्रज्ञानस्यापि आवश्यकता विद्यते। यदि देवताज्ञानं न भवति चेत् यागसम्पादने काठिन्यं भवति। अतः कथ्यते–

वेदितव्यं हि दैवत्यं मन्त्रे मन्त्रे प्रयत्नतः।
दैवतज्ञो हि मन्त्राणां तदर्थमधिगच्छति ॥ [3]
न हि कश्चिदविज्ञाय याथातथ्येन दैवतम्।
लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते ॥[4]
तत्र तत्र यथावच्च मन्त्रान्कर्मसु योजयेत्।

---

[1] एकं सद्विप्रा बहुधावदन्तीति। ऋग्वेदः – १/१६४/४६।
[2] निरुक्तम् -७/४।
[3] बृहद्देवता – १/२।

देवतायाः परिज्ञानात् तद्धिकर्म समृद्ध्यते ॥[5]

यस्य यस्य तु मन्त्रस्य उद्दिष्टं देवता तु या।

तदाकारो भवेत्तस्य देवत्त्वं देवतोच्यते ॥

उपर्युक्तप्रमाणैः कर्मसमृद्धये मन्त्रेषु देवतायाः ज्ञानं परमावश्यकमिति ज्ञायते। परन्तु यत्र अनादिष्ट-देवता-लिंगा मन्त्राः तेषु देवताः कथमन्वेष्या इति प्रश्ने बृहद्देवतायामुच्यते – यत्काममृषिः यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति।[6] अपि च अनादिष्टदैवतमन्त्रेषु देवतानिर्णयार्थमाचार्य यास्कः कथयति –

यद्दैवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति। अथान्यत्र यज्ञात्प्राजापत्या इति याज्ञिकाः। नाराशंसा इति नैरुक्ताः। अपि वा सा कामदेवता स्यात्। प्रायोदेवता वा। अस्ति ह्याचारो बहुलं लोके। देवदैवत्यमतिथिदैवत्यं पितृदैवत्यम्। याज्ञदैवतो मन्त्र इति ॥[7] तत्रैव यास्कः कथयति – यमर्थं कामयमानः ऋषिर्यस्यां देवतायां स्तुतिं करोति तद्देवताक एव स मन्त्रो भवति।[8]

देवतानां संख्या स्थानञ्च --

यास्ककृतनिरुक्तानुसारम् अग्निः पृथिवीस्थानस्य, वायुर्वेन्द्रो वान्तरिक्षस्थानस्य, सूर्योद्युस्थानस्य देवाः सन्ति। श्रूयते यथा – तिस्र एव देवता इति नैरुक्ताः। अग्निः पृथिवीस्थानः , वायुर्वेन्द्रो

---

[5] बृहद्देवता – १/४।

[6] बृहद्देवता – १/२१।

अर्थमिच्छनृषिर्देवं यं यमाहायमस्त्विति।

प्राधान्येन स्तुवन् भक्त्या मन्त्रस्तद्देव एव सः ॥ बृहद्देवता – १/६।

[7] निरुक्तम् – ७/१।

[8] निरुक्तम् – ७/१।

वान्तरिक्षस्थानः सूर्यो द्युस्थानः।[9] ऋग्वेदानुसारं त्रयस्त्रिंशद्देवताः भवन्तीति श्रूयते यथा- ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन्। विदन्नहद्वितासनन्।[10] अर्थात् त्रिंशति, त्रिशंत् संख्यायाः परस्तात् त्रयस्त्रिंशद्देवतेत्यर्थः। ये देवासः देवाः बर्हिः अस्मदीययज्ञसम्बद्धाः बर्हिपि हविः स्वीकरणार्थं ते आसदन् आसीदन्तु। अथानन्तरं ते देवा अस्माकं यागे आगच्छन्तु। पुनश्च तत्रैव एकस्मिन् मन्त्रे देवानां संख्या त्रिसहस्त्रत्रिशतानि एकोनचत्वारिंशदिति परिगणितानि सन्ति। यथा- त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्। औक्षन् घृतैरस्तृणन् बर्हिरस्माऽदिद्धोतारं न्यसादयन्त॥[11] शुक्लयजुर्वेदानुसारं प्रतिलोकमेकादशसंख्यकाः देवाः सन्ति।[12] तेषु नद्यः, पृथिवी, अग्निः, सोमः, बृहस्पत्यादयश्च पृथिवीस्थानीयदेवाः। इन्द्र, अपानपात्, मातरिश्वा, अहिर्बुध्न्यः, रुद्रः, मरुत्, वायुः, वातः, पर्जन्यः, आपः इत्यादयश्च अन्तरिक्षस्थानीयदेवाः। द्यौः, वरुणः, मित्रः, सूर्यः, सविता, पूषा, विवस्वान्, आदित्यगणः, उषा, अश्विनौ इत्यादयश्च द्युस्थानीयदेवाः।

शतपथब्राह्मणानुसारं त्रयस्त्रिंशद्देवाः भवन्ति – अष्टौ वसवः, एकादशरुद्राः, द्वादशादित्याः, इन्द्रः, प्रजापतिश्च। ऐतरेयब्राह्मणे इयं संख्या द्विगुणिता जाता। अत्र त्रयस्त्रिंशत् सोमपाः, त्रयस्त्रिंशत् असोमपाश्च देवाः भवन्ति।[13] पुनश्च एकां देवतां बहुदेवतारूपेण जनाः

---

[9] निरुक्तम् – ७/२।

[10] ऋग्वेदः – ८/२८/१।

[11] ऋग्वेदः – ३/९/९, १०/५२/६, शुक्लयजुर्वेदः – ३३/७ तै. ब्रा. – २/७/१२/२।

[12] ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ। अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ शुक्लयजुर्वेदः- ७/११।

[13] ऐतरेयब्राह्मणम् – २/३।

स्तुवन्तीति श्रूयते निरुक्ते यथा – महाभाग्याद् देवताया एक एव आत्मा बहुधा स्तूयते।[14]

देवतानां स्तुतिः - यद्यपि ऋग्वेदे बहुदेवतावादः दृष्टिगोचरीभूतः भवति तथापि यदा यस्य देवस्य स्तुतिः क्रियते तदा सः देवः सर्वाधिकव्यापकः, सर्वशक्तिमान् लोकोपकारी च मन्यते। वरुणस्य स्तावकेषु सूक्तेषु स एव सर्वेषु देवेषु महान् तथा सर्वापेक्षया महत्त्वशाली अमन्यत। अन्ये देवगणाः तस्यैव शासने स्थित्वा स्वस्वनिश्चितकार्यस्य निर्वाहं कुर्वन्ति। तथैव अग्नेः स्तुतिकाले "अग्निरेव सर्वा देवता"[15] अग्निर्ब्रह्म[16] अग्निर्वा एष वैश्वानरो यद् यज्ञः[17] इति स्तुतिर्भवति। अथर्ववेदस्य गणपत्यथर्वशीर्षे गणेशस्य स्तुतिकाले सर्वदेवरूपत्वेन गणपतिः स्तूयते यथा–"त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम्" इति।

ऋग्वेदस्य वागांभृणीसूक्ते महामायी दूर्गा सर्वशक्तिरूपा इति श्रूयते, यथा – 'अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यै रुत विश्वदेवैः। अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नीमहमश्विनोभा"[18]॥ इति।

जगदिदं सर्वं रुद्रमयम् इति रुद्रदेवस्य स्तुतिकाले श्रूयते, यथा- असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम्। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥[19] नारायणस्य विषये नारायणोपनिषदि श्रूयते

---

[14] निरुक्तम् – ७/४।

[15] ऐतरेयब्राह्मणम् – २/३ अग्निर्वै सर्वा देवताः – मैत्रायणि -१/४/१३।

[16] काठक सं -८/४।

[17] जै.सं - १/१७३।

[18] ऋग्वेदः – १०/१२५/१।

[19] शुक्लयजुर्वेदकाण्वसंहिता – १७/५४।

यथा- "नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शुक्रश्च नारायणः। द्यावापृथिव्यौ च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। ऊर्ध्वश्च नारायणः। अधश्च नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदं सर्वम्। यद्भूतं यच्च भव्यम्। निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति कश्चित्"॥[20] इति।

देवतानां कार्यम् – आचार्ययास्कानुसारं तिस्र एव देवता भवन्ति। तत्र अग्निः पृथिवीस्थानस्य देवता। वहनं च हविषामावाहनं च देवतानाम्। यच्च किञ्चिद् दार्ष्टिविषयकमग्निकर्मैव। ततः हविवहनकारणात् अग्निः देवानां दूत इति कथ्यते।[21] यज्ञकर्मणि देवानामावाहनकार्यमपि अग्नेः कर्म वर्तते।[22] इन्द्रः अन्तरिक्षस्थानस्य देवता। अथास्य कर्म रसानुप्रदानं वृत्रवधः। या च का च बलकृतिरिन्द्रकर्मैव तत् भवति।[23] एतदर्थं द्रविणोदा इति शब्देन सम्बोध्यते इन्द्रः। द्युलोकस्य देवता आदित्यः। अथास्य कर्म रसादानं रश्मिभिश्च रसधारणम्। यच्च किञ्चित्प्रवह्लितमादित्यकर्मैव तद्भवति।[24]

देवानां परस्परसम्बन्धः – देवाः स्वमहिम्नः प्रभावेण च प्रकृतिरूपात् एकस्मात् अन्यदेवमुत्पादयन्ति। अतः एकेन देवेन साकम् अपरदेवस्य सम्बन्धो वर्तते। यज्ञकर्मणि देवाः हविग्रहणे सङ्गतिं साहचर्यं च दर्शयन्ति। कदाचित् समत्वप्रतिपादनार्थं देवाः युग्मरूपेण सामूहिक-रूपेण वा स्तुताः भवन्ति। यथा- मित्रावरुणौ, अश्विनिकुमारौ,

20 नारायणोपनिषद।

21 अग्निदूतं पुरोदधे हव्यवाहमुप ब्रुवे। - यजुर्वेदः – २२/१७।

22 अग्निर्वै देवानां होता – ऐतरेय ब्राह्मणम् – १/२८।

23 निरुक्तम् – ७/३।

24 निरुक्तम् -७/३।

द्यावापृथिव्यौ इत्यादयः। वैदिकमन्त्राणां प्रयोगतः देवानां साहचर्यम् अनुभूयते। तत्र इन्द्र-सोम-वरुण-पर्जन्य-ऋतवः-पुषादयः देवाः स्थानभेदेन कालभेदेन वा अग्नेः साहचर्यं लभन्ते इति दृश्यते। अग्नि-सोम-वरुण-पूषा-बृहस्पति-ब्रह्मणस्पति-पर्वत-कुत्स-विष्णु-वायु-मित्रादयः देवाः इन्द्रेण साकं साहचर्यभावं धारयन्ति। आदित्यस्य चन्द्रमसा वायुना संवत्सरेणेति संस्तवः दृश्यते।[25]

देवानामाकारचिन्तनम् -

पुरुषविधाः स्युः- चेतनावत्स्तुतिसाम्पन्नात्तथागुणकर्मनामभिः स्तुर्ति लभन्ते। तस्मात् देवाः पुरुषविधाः। तत्र प्रमाणभूताः मन्त्राः –पौरुषविधिकैरङ्गैः संस्तूयते– "ऋष्वा तऽइन्द्र स्थविरस्य बाहू"[26] "यत्संगृभ्णा मघवन्काशिरित्ते"[27]

पौरुषविधिकैर्द्रव्यसंयोगैः - आ द्वाभ्यां हरिभ्यामिन्द्र याहि,[28] कल्याणीर्जाया सुरणं गृहे ते।[29] पौरुषविधिकैः कर्मभिः - अद्धीन्द्र पिब च प्रस्थितस्य,[30] आश्रुत्कर्ण श्रुधी हवम्।[31] इति।

अपुरुषविधाः स्युरित्यपरम्—

यद् दृश्यतेऽग्निर्वायुरादित्यः पृथिवी चन्द्रमा इति। चेतनावत्स्वेव न प्रवर्तन्तेऽपि तु अचेतनेष्वपि चेतनावत् स्तुतयः

---

[25] निरुक्तम् -७/३।
[26] ऋग्वेदः – ६/४७/८।
[27] ऋग्वेदः – ३/३०/५।
[28] ऋग्वेदः – २/१८/४।
[29] ऋग्वेदः – ३/५३/६।
[30] ऋग्वेदः – १०/११६/७।
[31] ऋग्वेदः – १/१०/९।

प्रवर्तन्ते। यथाक्षप्रभृतीन्योषधिपर्यन्तानि। पौरुषविधिकैरङ्गैः संस्तूयत इत्यचेतनेष्वपि एतद्भवति। यथा – "अभिक्रन्दन्ति हरितेभिरासभिः"[32] इति ग्रावस्तुतिः। पौरुषविधिकैर्द्रव्यसंयोगैः संस्तूयत इत्यचेतनेष्वपि एतद्भवति। यथा - "सुखं रथं युयुजे सिन्धुरश्विनम्,"[33] इति नदीस्तुतिः। पौरुषविधिकैः कर्मभिः संस्तूयत इत्यचेतनेष्वपि एतद्भवति। यथा - होतुश्चित्पूर्वे हविरद्यमाशत,[34] इति ग्रावस्तुतिः।

उभयविधाः स्युः - उभयत्र प्रामाण्यात्, पुरुषविधाश्च अपुरुषविधाश्चेत्यर्थः।

कर्मार्थात्मोभयविधाः स्युः – पुरुषविधानामेव सतां कर्मात्मान एते स्युः। यथा – यज्ञो यजमानस्य।

एष चाख्यानसमयः - महाभारते एष एव सिद्धान्तः प्रदर्शितः। पृथिवी स्त्री-रूपेण भारावतारणाय ब्रह्माणं ययाचे। अग्निश्च ब्राह्मणरूपेण वासुदेवार्जुनादुभौ खाण्डवं ययाचे। अनेन स्पष्टं भवति देवाः चतुर्विधाः भवन्ति– पुरुषविधाः, अपुरुषविधाः, उभयविधाः, कर्मार्थात्मोभयविधाः इति। अतः निष्कर्षरूपेण वक्तुमिच्छामि यत् सम्पूर्णं जगत् देवमयं वर्तते। ईश्वरेण सृष्टमिदं जगत् इश्वर एव नान्यत् इति शुक्लयजुर्वेदीय श्रुतिवचनम्-

"ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥[35] इति शम्।

---

[32] ऋग्वेदः –१०/९४/२।
[33] ऋग्वेदः –१०/७५/९।
[34] ऋग्वेदः – १०/९४/२।
[35] शुक्लयजुर्वेदः-४०/१।

# सन्दर्भग्रन्थसूची


१. वैदिक साहित्य एवं संस्कृति - डॉ. कपिलदेवद्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी।

२. शतपथब्राह्मणम् - डॉ. अल्बेर्तन वेबेरेण शोधितम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।

३. ऋग्वेदसंहिता- श्रीमत्सायणाचार्यविरचितभाष्यसमेता,वैदिकसंशोधनमण्डल, पुने,१९०५।

४. शुक्लयजुर्वेद संहिता- उव्वट-महीधरभाष्यसंवलित तत्वबोधिनि हिन्दी-व्याख्योपेता, संकलक: पणशीकरोपाह्वो वासुदेवशर्मा, चौखम्बा विद्याभवन, वाराणसी , १९९२।

५. निरुक्तम् – छज्जुराम शास्त्री, मेहरचन्द्र लछमनदास पब्लिकेशन्स,नईदिल्ली,१९९३।

६. अथर्ववेद – सायणभाष्यसहित, चौखम्बा विद्याभवन, वाराणसी।

७. ऐतरेयब्राह्मणम् – सुखप्रदाख्यवृत्ति सहितम्, नागपब्लिसर्स,१९९१।

८. ईशादि नौ उपनिषद् - गीताप्रेस, गोरखपुर, उत्तरप्रदेशः।

९. बृहद्देवता - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।


*****